॥ श्रीः ॥

# उपोद्घातः ।

( १ )

अथाऽयमुपक्रम्यतेऽधिकरणकौमुदीनामा श्रीदेवनाथठक्कुरकृतः पूर्वमीमांसाग्रन्थो मुद्रयित्वा प्रकाशयितुम् । ग्रन्थोऽयं लघुतमोऽपि पूर्वमीमांसासागरं लिलङ्घयिषतां प्रवहणमिव परतीरावाप्तये सुखसाधनायते इत्यत्र न कस्याऽपि विप्रतिपत्तिः ।

ग्रन्थेऽस्मिन् ग्रन्थकर्त्रा श्रुत्येकप्रतिपाद्यधर्मविचाराय प्रवृत्तस्य पूर्वमीमांसाशास्त्रस्य अधिकरणात्मकतया तेषां चाऽधिकरणानां साकल्येन विवेचनोपन्यासमुखेन प्रायः सर्वेऽपि पूर्वमीमांसाशास्त्रीया विषयाः शोभनसुगमपरिपाट्या प्रतिपादिताः । सविस्तरं चैते प्रदर्शिता अत्रैव सङ्कलिते सूचीपत्रे इति पुनस्तेषामत्रोपवर्णनं पिष्टपेषणप्रायमिति न क्रियते ।

( २ )

अस्य ग्रन्थस्य निर्माता श्रीदेवनाथठक्कुरः मैथिलब्राह्मणः काव्यप्रदीपकर्तुर्गोविन्दठक्कुरस्य पुत्रः केशवठक्कुरस्य पौत्रः बुद्धिकरठक्कुरस्य प्रपौत्रः रविकरठक्कुरस्य वृद्धप्रपौत्रः 'घुसौते नगवार' इत्येतत्समाख्ये वंशविशेषे समुत्पन्नो मिथिलामध्यास्तेति प्रसिद्धम् । सुनिरूपितोऽयमर्थो मैथिलानां पञ्जीबन्धपुस्तके ।

अस्य समयस्तु ४२५ ( १५३२ ई. स. ) लक्ष्मणसेनशकात् परत इत्यनुमातुं शक्यते । यतः श्रीदेवनाथठक्कुरस्य कनीयसाऽनुजेन मधुसूदनठक्कुरेण पक्षधरमिश्रकृतचिन्तामण्यालोकोपरि कण्टकोद्धाराख्यं व्याख्यानं विदधता "चक्रे रामकनीयसोऽवनिपतेः शीतांशुनन्दाम्बुधावङ्के" ( ४९१ ल. स. ) इतिस्वसमयः प्रदर्शितः । तत्पूर्वभावित्वं तदग्रजस्याऽवश्यप्राप्तमिति मत्प्रदर्शित एव समयः समापतति ।

'न्यायपञ्चानन' इत्यस्य पदवी आसीत् । 'सोमभट्ट' इत्यस्य गुरोर्नाम । 'सोमभट्टोपदिष्टेन पथा सञ्चरतोऽधुना' इति ग्रन्थान्ते ग्रन्थकर्त्रा स्वयमेवाऽभिहितम् ।

अनेन निर्मितास्चतस्रः कौमुद्य उपलभ्यन्ते-(१) अधिकरणकौमुदी (२) काव्यकौमुदी ( काव्यप्रकाशटीका ) (३) तन्त्रकौमुदी (४) स्मृतिकौमुदी चेति ।

( ३ )

तत्र तावदिदानीं 'अधिकरणकौमुदी'नाम्ना निबन्धद्वयं समुपलभ्यते । एका रामकृष्णभट्टाचार्यैः प्रणीता मुद्रिता । अपरा चेयं श्रीमतां करतलगता तर्कपञ्चाननठक्कुरदेवनाथप्रणीता । तत्राऽऽद्या तत्तदधिकरणानि निरूप्य तदुदाहरणमुखेन स्मृतिवचनोपन्यासिका । द्वितीया चेयं स्मृतिवचनान्युपादाय तदर्थनिरूपणमूलतया तत्तदधिकरणोपन्यासिका सरला चेति द्वयोरपि विषयनिरूपणशैलीतारतम्यम् । अतः पूर्वाऽपेक्षया झटिति धर्मशास्त्रे प्रविविक्षूणामियमेवाऽतिशयमुपकरोतीति विदुषामनुभवः ।

( ४ )

ग्रन्थोऽयं काशीस्थराजकीयसंस्कृतपरीक्षासु मीमांसाधर्मशास्त्रयोः परीक्ष्यपाठ्यग्रन्थत्वेन निर्द्धारितः षोडशवर्षेभ्यः पूर्वं श्रीपरमेश्वरझामहोदयैः प्रकाशितोऽपि इदानीमापणे सुदुरधिगम इति परीक्षोत्सुकानामध्येतृणामनुपपत्तिमालोच्य श्रीमद्भिः पूज्यवरैः प्राच्यप्रतीच्योभयदर्शनसम्भेदकृतावगाहैः पण्डितप्रकाण्डैः काशीस्थराजकीयपाठालयप्रधानाध्यक्षैः श्रीगोपीनाथकविराज M.A.महोदयैरेतत्प्रकाशनायादिष्टोऽहं चौखम्बासंस्कृतपुस्तकमालाध्यक्षबाबूजयकृष्णदासगुप्तानुरोधेन चात्र प्रावर्तिषि ।

एतद्ग्रन्थमुद्रणाधारभूतानि पुस्तकानि त्रीणि । तत्र प्रथमं काशीस्थराजकीयसरस्वतीभवनपुस्तकालयस्थमेकं नाऽतिशुद्धम् । द्वितीयं पण्डितवराणां अशेषशास्त्राऽवगाहनप्रदीप्तप्रज्ञाऽतिशयानां ऋषिकल्पानां पूज्यपादानां श्रीवीरेश्वरशास्त्रिद्राविडमहोदयानां अतीव संशोधितं रमणीयम् । तृतीयं श्रीपरमेश्वरझामहोदयैः षोडशवत्सरेभ्यः पूर्वं मुद्रितम् ।इमानि त्रीणि पुस्तकान्यवलम्ब्य समुचितपाठभेदं च उपन्यस्य सुसम्पादितोऽयं ग्रन्थस्तज्ज्ञान् विनोदयेदित्याशासे ।

अस्य ग्रन्थस्य सम्पादने पाठभेदाऽऽकलने सूचीपत्रनिर्माणे च अत्रस्यराजकीयसरस्वतीभवनपुस्तकालये साधोलालरिसर्चछात्रवृत्तिभाजा धर्मशास्त्रशास्त्रिणा वरकलोपनामकवैद्यनाथशास्त्रिणा सुमहत् साहाय्यमाचरितमिति सकौतुकं तमभ्यभिनन्दामि । इतिशम् ।

सरस्वतीभवन,<br>काशी । } नारायणशास्त्री खिस्ते

# अधिकरणकौमुदीस्थविषयसूची ।


| विषयाः | पृ० |
|---|---|
| १ मङ्गलाऽऽचरणम् । | १ |
| २ अनुबन्धनिरूपणम् । | १ |
| ३ ग्रन्थस्थविषयसूचीनिरूपणम् । | १ |
| ४ अधिकरणपदार्थनिरूपणम् । | २ |
| ५ अधिकरणाऽपरपर्यायमीमांसासिद्धान्तस्थमीमांसापदार्थ-निर्वचनम् । | २ |
| ६ मीमांसाया ( धर्मविचारशास्त्रस्य ) आवश्यकत्वनिरूपणम् । | २ |
| ७ धर्मप्रमाणनिरूपणम् । | ४ |
| ८ धर्मप्रमाणभूतवेदादिमध्यस्थविध्यादिभेदनिरूपणम् । | ५ |
| ९ विधिनिरूपणप्रसङ्गान्नियमपरिसंख्यादीनां मतान्तरखण्डनमण्डन-निरूपणपूर्वकं तद्भेदकानां च निरूपणम् । | ५ |
| १० अर्थवादनिरूपणम् । | ८ |
| ११ प्रसज्यप्रतिषेधपर्युदासयोर्निरूपणम् । | ९ |
| १२ प्रसङ्गतन्त्रयोर्निरूपणम् । | १२ |
| १३ साहित्यसहत्वनिरूपणम् । | १३ |
| १४ श्रुतिलिङ्गादिनिरूपणम् । | १३ |
| १५ श्रुतिलिङ्गयोः श्रुतेर्बलवत्त्वनिरूपणम् । | १५ |
| १६ लिङ्गवाक्ययोर्लिङ्गस्य बलवत्त्वम् । | १६ |
| १७ वाक्यप्रकरणयोर्वाक्यस्य बलवत्त्वम् । | १६ |
| १८ प्रकरणस्थानयोः प्रकरणस्य बलवत्त्वम् । | १७ |
| १९ स्थानसमाख्ययोः स्थानस्य बलवत्त्वम् । | १७ |
| २० विधेर्बाधसापेक्षत्वम् । | १८ |
| २१ प्रतिप्रसवनिरूपणम् । | १८ |
| २२ विकल्पे व्यवस्थितविकल्पनिरूपणम् । | १९ |
| २३ ऐच्छिकविकल्पनिरूपणम् । | १९ |
| २४ ऐच्छिकविकल्पेऽष्टविधदोषनिरूपणम् । | १९ |
| २५ योगसिद्ध्यधिकरणनिरूपणम् । | २० |
| २६ तिर्यगधिकरणनिरूपणम् । | २० |

| विषयाः । | पृ० |
|---|---|
| ५९ खलेवालीयूपाऽधिकरणम । | ४२ |
| ६० अनुक्रमबलाऽबलाऽधिकरणम् । | ४२ |
| ६१ अरुणाऽधिकरणम् । | ४३ |
| ६२ पदपांश्वधिकरणम् । | ४४ |
| ६३ सामान्यविशेषाऽधिकरणम् । | ४५ |
| ६४ आश्रयाऽधिकरणम । | ४६ |
| ६५ शंय्वधिकरणम् । | ४६ |
| ६६ प्रधानस्वाम्यधिकरणम् । ( ऋत्विजां शास्त्रदेशित प्रतिनिधित्वाधिकरणम ) | ४७ |
| ६७ अभ्युदितेष्ट्यधिकरणम् । | ४८ |
| ६८ आग्नेय्यधिकरणम् । | ४९ |
| ६९ प्रक्रमाऽधिकरणम् । | ४९ |
| ७० देवताऽधिकरणम् । | ५० |
| ७१ विशेषाऽनन्तत्वात्सामान्याविधिकल्पनाऽधिकरणम् । | ५१ |
| ७२ सत्राऽधिकरणम् । | ५१ |
| ७३ अधिकारबलाऽबलाधिकरणम् । | ५२ |
| ७४ संयोगपृथक्त्वाऽधिकरणम् । | ५३ |
| ७५ गौणमुख्याऽधिकरणम । | ५४ |
| ७६ योयक्ष्यक्ताऽधिकरणम । | ५६ |
| ७७ गुणलोपेनमुख्यस्याऽधिकरणम । | ५६ |
| ७८ आरम्भणीयेष्ट्यधिकरणम । | ५७ |
| ७९ वाजिनाऽपन्नाराऽधिकरणम् । | ५७ |
| ८० आश्विनग्रहाऽधिकरणम् । | ५८ |
| ८१ विनियुक्तविरोधाऽधिकरणम् । | ५९ |
| ८२ क्वचिदतिदेशस्यबाध्यत्वाऽभावाऽधिकरणम् । | ५९ |
| ८३ स्तुतशस्त्राऽधिकरणम् । | ६० |
| ८४ स्फ्याऽऽश्लिष्टेज्याऽधिकरणम् । | ६१ |
| ८५ तक्षसूत्रविरोधाऽधिकरणम् । | ६२ |
| ८६ ग्रन्थसमाप्तिः । | ६२ |

जुहोति" "अनुदिते जुहोति" "समयाध्युषिते जुहोति" इत्यत्र शाखिभेदेन वैकल्पिकविधौ तदारम्भकाल एव नियम्यते। अन्यथाऽसम्भवात्, कालसौक्ष्म्यादिति न किंचिदेतत्। तदेवमतिपीडनेनारम्भ (१) एव कालाङ्गतालाघवं शरणम्, अङ्गवैगुण्यमेवाऽनधिकारिबीजमित्यलमनेन।

ब्रह्मपुराणे—

अथ चैत्र्यां वृषोत्सर्गः कार्त्तिक्यां वा प्रयत्नतः।
कर्त्तव्यस्त्वथ रेवत्यां त्रिभिर्वर्णैर्द्विजातिभिः॥

ननु 'सम्पूज्य' इत्यादिवचनेन दम्पतिपूजावृषोत्सर्गयोः पौर्वापर्यनियमादत्रापि दम्पतिपूजेति चेन्न। तस्याऽऽशौचद्वितीयाहरूपसन्निहितव्यक्तिविशेषपरत्वात्। 'बृहति (२)स्तूयमाने समुद्रं(३)ध्यायेत् रथन्तरे पृथिवीम्' इत्यादौ यागविशेषसम्बन्धिबृहत्सामजपादेः समुद्रादि(४)ध्यानाङ्गत्ववत्। आग्नेयीन्यायात्। तथाहि—"आग्नेय्याऽऽग्नीध्रमुपतिष्ठते"(५) इत्यत्राऽग्निदेवताका ऋक्(६)आग्नीध्रोपस्थाने विनियुज्यते। बह्विदेवताकानां च बहुत्वादनध्यवसाये सन्निहिताया एव ऋचो विनियोजनम्। लाघवात्। एतदेव व्यक्तिवचनानां सन्निहितविशेषपरत्वमुच्यते इति। तदेवमतिपीडनेन लाघवमेव शरणमित्यलमनेन।

वराहपुराणे—

एकादश्यां निराहारो भूत्वाऽहनि परे ह्यहम्।
भोक्ष्यामि पुण्डरीकाक्ष शरणं त्वं भवाऽच्युत॥
सङ्कल्प्यैवं ततो रात्रौ वासु(७)देवस्य सन्निधौ।
जपेन्नारायणायेति स्वपेदथ विधानतः।

नन्वेवं सङ्कल्प्येत्यभिधानात् दशम्यां वाक्यपाठ एव सङ्कल्प इति चेन्न। तत्र सङ्कल्पपदस्य गौणत्वात्। अन्यथा प्रक्रमाऽधिकरणविरोधात्। तत्र हि काम्ये कामनाऽभिलापपूर्वकः कुशतिलजलत्यागात्मकः सङ्कल्पः शास्त्रार्थः इत्युक्तम्। मनसा इच्छति, वाचाऽभिलपति, कर्मणा निष्पादयति, इति क्रमबोधनात्। यद्प्येवम्।

(१) 'एव' नास्ति पुस्तकान्तरे।
(२) 'प्रस्तूयमाने' इति पाठः पुस्तकान्तरे।
(३) 'समुद्रं मनसा' इति पाठः पुस्तकान्तरे।
(४) 'समुद्रध्याना' इति पाठः पुस्तकान्तरे।
(५) 'त्या गार्हपत्यमुप' इति पुस्तकान्तरे पाठः।
(६) 'गार्हपत्योप' इति पाठः पुस्तकान्तरे।
(७) 'वासु'इत्यत्र 'देव' इति पाठः पुस्तकान्तरे।

